# Devaih Kritam 09 Vishnu Stotram

# देवैः कृतं ९ विष्णुस्तोत्रम्

## Document Information

Text title : Devaih Kritam 09 Vishnu Stotram

File name : devaiHkRRitaM09viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | vaiShNavakhaNDa | vAsudevakhaNDa | adhyAya 10/22-34||

Latest update : May 15, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 15, 2025

*sanskritdocuments.org*

# देवैः कृतं ९ विष्णुस्तोत्रम्

देवा ऊचुः ।
ॐ नमो भगवते तुभ्यं वासुदेवाय धीमहि ।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥ २२॥

ॐ कारब्रह्मरूपाय त्रेधाऽऽविष्कृतमूर्तये ।
ब्रह्माण्डसर्गस्थित्यन्तहेतवे निर्गुणाय च ॥ २३॥

नयनानन्दरूपाय प्रणतक्लेशनाशिने ।
केशवाय नमस्तुभ्यं स्वतन्त्रेश्वरमूर्तये ॥ २४॥

मोदिताशेषभक्ताय कालमायादिमोहिने ।
सदानन्दाय कृष्णाय नमः सद्धर्मवर्त्तिने ॥। २५॥

भवाम्बुधिनिमग्नानामुद्धृतिक्षमकीर्तये ।
दर्शनीयस्वरूपाय घनश्यामाय ते नमः ॥ २६॥

गदाब्जदरचक्राणि बिभ्रते दीर्घबाहुभिः ।
सुरगोविप्रधर्माणां गोप्त्रे तुभ्यं नमो नमः ॥ २७॥

वरेण्याय प्रपन्नानामभीष्टवरदायिने ।
निगमागमवेद्याय वेदगर्भाय ते नमः ॥ २८॥

तेजोमण्डलमध्यस्थदिव्यसुन्दरमूर्तये ।
नमामो विष्णवे तुभ्यं परात्परतराय च ॥ २९॥

वाणीमनोविप्रकृष्टमहिम्नेऽक्षररूपिणे ।
सर्वान्तर्यामिणे तुभ्यं बृहते च नमो नमः ॥ ९.१०.३०॥

सुखदोऽसि त्वमेवैकः स्वाश्रितानामतो वयम् ।
महापदाधिकक्लिष्टाः शरणं त्वामुपागताः ॥ ३१॥

देवाधिदेवभक्तस्य तव दुर्वाससो वयम् ।

अतिक्रमाच्छ्रिया हीनाः प्राप्ताः स्मो दुर्दशामिमाम् ॥ ३२॥

वासोऽन्नपानस्थानादिहीनान्धर्मोऽपि नः प्रभो ।
त्यक्त्वा सह श्रिया यातस्तान्पातुं त्वमसीश्वरः ॥ ३३॥

यतो वयं च धर्मश्च त्वदीया इति विश्रुताः ।
यथापूर्वं सुखीकर्त्तुं त्वमेवार्हस्यतो हि नः ॥ ३४॥

इति श्रीस्कन्दपुराणे वैष्णवखण्डे वासुदेवमाससमाहात्म्ये दशमाध्यायान्तर्गतं देवैः कृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । वैष्णवखण्ड । वासुदेवखण्ड । अध्याय १०/२२-३४॥

skandapurANa . vaiShNavakhaNDa . vAsudevakhaNDa . adhyAya 10/22-34..

Proofread by PSA Easwaran

---

*Devaih Kritam 09 Vishnu Stotram*

pdf was typeset on May 15, 2025

Please send corrections to *sanskrit@cheerful.com*